# SANSKRIT

Question Booklet Sl. No. **070314**

Name & Signature of the Invigilator

.........................................................

.........................................................

**PAPER – II** OMR Answer Sheet No. :

**CODE-07** Roll No. :

(in figures as in Hall Ticket)

Roll Number in words : ..................................

..................................................................

**Time : 2 Hours]** **No. of Printed Pages : 16** **[Maximum Marks : 200**

## Instructions for the Candidates

1. Write your Roll Number in the space provided on the top of this page.
2. This paper consists of **one hundred (100)** multiple choice type of questions. **All** questions are compulsory.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker seal and do not accept an open booklet.
   (ii) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   (iii) After this verification is over, the Test Booklet Number should be entered on the OMR Answer Sheet and the OMR Answer Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the oval as indicated below on the correct response against each item.
   **Example:** (A) ⬬ (C) (D) where (B) is the correct response.
5. Your responses to the items are to be indicated on the OMR Answer Sheet under Paper – II only. If you mark your response at any place other than in the oval in the OMR Answer Sheet, it will not be evaluated.
6. Rough Work is to be done in the end of this booklet.
7. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Answer Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. You have to return the original OMR Answer Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry original question booklet and duplicate copy of OMR Answer Sheet on conclusion of examination.
9. Use only Blue/Black Ball point pen.
10. Use of any calculator or any electronic devices or log table etc., are prohibited.
11. There shall be no negative marking.

## પરીક્ષાર્થીઓ માટે સૂચનાઓ

1. આ પાનાની ટોચ પર દર્શાવેલી જગ્યામાં તમારો રોલ નંબર લખો.
2. આ પ્રશ્નપત્રમાં બહુવૈકલ્પિક ઉત્તરો ધરાવતા સો (૧૦૦) પ્રશ્નો આપેલા છે. બધા જ પ્રશ્નો ફરજિયાત છે.
3. પરીક્ષાની શરૂઆતમાં આપને પ્રશ્નપુસ્તિકા આપવામાં આવશે. પ્રથમ પાંચ (૫) મિનિટ દરમ્યાન તમારે પ્રશ્નપુસ્તિકા ખોલી અને ફરજિયાતપણે નીચે મુજબ પરીક્ષણ કરવું :
   (i) પ્રશ્નપુસ્તિકાનો વપરાશ કરવા માટે આ કવર પૃષ્ઠની ધાર પર આપેલ સીલ સ્ટીકર ફાડી નાખો. કોઈપણ સંજોગોમાં સીલ સ્ટીકર વગરની કે ખુલ્લી પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં.
   (ii) કવર પૃષ્ઠ પર છપાયેલ નિર્દેશાનુસાર પ્રશ્નપુસ્તિકાના પ્રશ્નો, પૃષ્ઠો અને સંખ્યાને બરાબર ચકાસી લો. ખામીયુક્ત પ્રશ્નપુસ્તિકા કે જેમાં પ્રશ્નો/ પૃષ્ઠો ઓછાં હોય, બે વાર છપાયા હોય, અનુક્રમમાં અથવા અન્ય કોઈ ફરક હોય અર્થાત કોઈપણ સંજોગોમાં ખામીયુક્ત પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં. અને જો ખામીયુક્ત પ્રશ્નપુસ્તિકા મળી હોય તો નિરીક્ષક પાસેથી તુરંત જ બીજી સારી પ્રશ્નપુસ્તિકા મેળવી લેવી. આ માટે ઉમેદવારને પાંચ (૫) મિનિટનો સમયગાળો આપવામાં આવશે. પછીથી, પ્રશ્નપુસ્તિકા બદલવામાં આવશે નહીં કે કોઈ વધારાનો સમયગાળો આપવામાં આવશે નહીં.
   (iii) આ ચકાસણી સમાપ્ત થાય પછી, પ્રશ્નપુસ્તિકાનો નંબર OMR જવાબ પત્રક પર લખવો અને OMR જવાબ પત્રકનો નંબર પ્રશ્નપુસ્તિકા પર લખવો.
4. પ્રત્યેક પ્રશ્ન માટે ચાર જવાબ વિકલ્પ (A), (B), (C) અને (D) આપવામાં આવેલ છે. તમારે સાચા જવાબના ઓવલ (oval)ને નીચે આપેલ ઉદાહરણ મુજબ પેનથી ભરીને સંપૂર્ણ કાળું કરવાનું રહેશે.
   **ઉદાહરણ** : (A) ⬬ (C) (D) કે જ્યાં (B) સાચો જવાબ છે.
5. આ પ્રશ્નપુસ્તિકાના પ્રશ્નોના જવાબ અલગથી આપવામાં આવેલ OMR જવાબ પત્રકમાં પેપર-IIલખેલ વિભાગમાં જ અંકિત કરવા. જો આપ OMR જવાબ પત્રકમાં આપેલ ઓવલ (oval) સિવાય અન્ય સ્થાને જવાબ અંકિત કરશો તો તે જવાબનું મૂલ્યાંકન કરવામાં આવશે નહીં.
6. કાચું કામ (Rough work) પ્રશ્નપુસ્તિકાના અંતિમ પૃષ્ઠ પર કરવું.
7. જો આપ OMR જવાબ પત્રક નિયત જગ્યા સિવાય અન્ય કોઈપણ સ્થાને, આપનું નામ, રોલ નંબર, ફોન નંબર અથવા એવું કોઈ ચિહ્નકે જેનાથી તમારી ઓળખ થઈ શકે, અંકિત કરશો અથવા અભદ્ર ભાષાનો પ્રયોગ કરો, અથવા અન્ય કોઈ અનુચિત સાધનોનો ઉપયોગ કરો, જેમકે અંકિત કરી દીધેલ જવાબ ભૂંસી નાખવો કે સફેદ શાહીનો ઉપયોગ કરી બદલશો તો આપને પરીક્ષા માટે અયોગ્ય જાહેર કરવામાં આવશે.
8. પરીક્ષા સમય પૂરો થઈ ગયા બાદ ઓરીજીનલ OMR જવાબ પત્રક જે તે નિરીક્ષકને ફરજિયાત સોંપી દેવું અને કોઈ પણ સંજોગોમાં તે પરીક્ષા ખંડની બહાર લઈ જવું નહીં. પરીક્ષા પૂર્ણ થયા બાદ ઉમેદવાર ઓરીજીનલ પ્રશ્નપુસ્તિકા અને OMR જવાબ પત્રકની ડુપ્લિકેટ કોપી પોતાની સાથે લઈ જઈ શકે છે.
9. માત્ર કાળી / ભૂરી બોલ પોઈન્ટ પેન વાપરવી.
10. કેલક્યુલેટર,લોગ ટેબલ અને અન્ય ઈલેક્ટ્રોનિક યંત્રોનો ઉપયોગ કરવાની મનાઈ છે.
11. ખોટા જવાબ માટે નકારાત્મક ગુણાંકન પ્રથા નથી.

SEAL

DO NOT WRITE HERE

# SANSKRIT

## Paper – II

1. 'ओ चित् सखायं सख्या ववृत्याम्' – इति मन्त्र: कस्मिन् सूक्ते सम्प्राप्यते ?

(A) नासदीयसूक्ते
(B) सरमा–पणि–संवादसूक्ते
(C) पुरुरवा–उर्वशी–संवादसूक्ते
(D) यम–यमी–संवादसूक्ते

2. 'नारदीय–शिक्षा' केन वेदेन सह सम्बद्धा ?

(A) सामवेद:
(B) यजुर्वेद:
(C) ऋग्वेद:
(D) अथर्ववेद:

3. दाक्षीपुत्र: क: ?

(A) पतञ्जलि:
(B) बादरायण:
(C) कात्यायन:
(D) पाणिनि:

4. 'मा गृध: कस्यस्विद् धनम्' – इति मन्त्रांश–सम्बद्धा उपनिषद् का ?

(A) ईशावास्योपनिषद्
(B) केनोपनिषद्
(C) कठोपनिषद्
(D) तैत्तिरीयोपनिषद्

5. कयो: द्वयो: वैदिककाल–निर्धारणपद्धति: नक्षत्राधारिता वर्तते ?

(A) मैक्सम्युलर–वेबर
(B) विण्टरनिट्झ–वेबर
(C) मैक्सम्युलर–जैकोबी
(D) जैकोबी–तिलक:

6. बौद्धदर्शनस्य कियन्तो भेदा: सन्ति ?

(A) चत्वार:
(B) पञ्च
(C) षट्
(D) अष्ट

7. 'ईश्वर–सिद्धि:' कस्य दर्शनस्य प्रतिपाद्यो विषय: ?

(A) योगदर्शनस्य
(B) सांख्यदर्शनस्य
(C) वैशेषिकदर्शनस्य
(D) न्यायदर्शनस्य

**8.** औलूक्य-दर्शनस्यापरं नाम किम् ?

(A) वैशेषिक-दर्शनम्
(B) जैमिनि-दर्शनम्
(C) वेदान्त-दर्शनम्
(D) न्याय-दर्शनम्

**9.** योगस्य बाह्यसाधनानि कति ?

(A) त्रीणि
(B) पञ्च
(C) सप्त
(D) अष्ट

**10.** ब्रह्मसूत्रे 'अथातो ब्रह्मजिज्ञासा' इत्यस्मिन् सूत्रे शाङ्करभाष्यानुसारं 'अथ' शब्दस्य कोऽर्थः परिगृहीतः ?

(A) अधिकारः
(B) मङ्गलम्
(C) आनन्तर्यः
(D) पूर्वप्रकृतापेक्षा

**11.** ब्रह्मसूत्रशाङ्करभाष्ये नित्यशुद्धबुद्धमुक्तस्वभावः कस्य ?

(A) ब्रह्मणः
(B) जीवस्य
(C) प्रकृतेः
(D) जगतः

**12.** साङ्ख्यदर्शने प्रकृतेः अनुपलब्धिः कस्मात् ?

(A) सौक्ष्म्यात्
(B) अभावात्
(C) अचेतनत्वात्
(D) कार्यात्

**13.** 'दृष्टाऽस्मीति' मत्वा का पुरुषस्य दर्शनं पुनर्न उपैति ?

(A) बुद्धिः
(B) तन्मात्रा
(C) प्रकृतिः
(D) विकृतिः

**14.** किं नाम उन्मीलनकरो वायुः ?

(A) धनञ्जयः
(B) कृकलः
(C) देवदत्तः
(D) कूर्मः

**15.** क्रियाशक्तिमान् कार्यरूपः कोशः __________ ।

(A) अन्नमयकोशः
(B) प्राणमयकोशः
(C) मनोमयकोशः
(D) आनन्दमयकोशः

**16.** वायौ पञ्चीकरणप्रक्रियायां वाय्वेतर-चतुर्णां भूतानां सम्मिलितमात्रा कति प्रतिशतं यावत् भवति ?

(A) 12.5%
(B) 25%
(C) 50%
(D) 75%

**17.** दिशः किं लक्षणम् ?

(A) चक्षुर्मात्रग्राह्यम्
(B) प्राच्यादिव्यवहारहेतुः
(C) ज्ञानाधिकरणम्
(D) रूपरहितस्पर्शवान्

**18.** 'शब्दो नित्यः शब्दत्वात्' इत्यत्र को हेत्वाभासः ?

(A) साधारणः
(B) असाधारणः
(C) बाधितः
(D) विरुद्धः

**19.** 'अथ शब्दानुशासनम्' कस्य प्रारम्भिक-वाक्यम् ?

(A) ब्रह्मसूत्रस्य
(B) जैमिनिसूत्रस्य
(C) योगसूत्रस्य
(D) महाभाष्यस्य

**20.** 'व्यक्ताव्यक्तज्ञ विज्ञानात्' इत्यत्र 'ज्ञ' इति शब्देन कः बोद्धव्यः ?

(A) पुरुषः
(B) प्रकृतिः
(C) जीवः
(D) वर्णविशेषः

**21.** कनिष्ठिका ऽधिष्ठितः कः कविरुच्यते ?

(A) भासः
(B) अश्वघोषः
(C) कालिदासः
(D) भारविः

**22.** भारविः भारतस्य कस्य भागस्य निवासी ?

(A) पूर्वभागस्य
(B) पश्चिमभागस्य
(C) उत्तरभागस्य
(D) दक्षिणभागस्य

**23.** अधोलिखितानाधारीकृत्य समुचितं विकल्पं चिनुत ।

| | |
|---|---|
| a. शिखरिणी | i. म स ज स त त गु |
| b. मन्दाक्रान्ता | ii. य म न स भ ल गु |
| c. हरिणी | iii. म भ न त त गु गु |
| d. शार्दूलविक्रीडितम् | iv. न स म र स ल गु |

| | **a** | **b** | **c** | **d** |
|---|---|---|---|---|
| (A) | ii | iii | iv | i |
| (B) | iii | ii | iv | i |
| (C) | ii | iii | i | iv |
| (D) | ii | iv | iii | i |

**24.** मृच्छकटिके शकार: चारुदत्तस्य क आसीत् ?

(A) श्याल: (B) जामाता (C) श्वश्रु: (D) भ्राता

**25.** 'स्वप्नवासवदत्ते' नाटके रुमण्वान् कस्मिन् पदे अधिष्ठित: ?

(A) मन्त्रीपदे (B) विदूषकपदे

(C) दण्डाधिकारीपदे (D) सेनापतिपदे

**26.** 'यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जन:' – इयमुक्ति: कस्मिन् नाटके विद्यते ?

(A) वेणीसंहारे (B) स्वप्नवासवदत्ते

(C) अभिज्ञानशाकुन्तले (D) उत्तररामचरिते

**27.** यूकमशकादीनि चतुर्विधशरीरस्य कस्मिन् विधे भवन्ति ?

(A) जरायुजे (B) अण्डजे (C) स्वेदजे (D) उद्भिज्जे

**28.** त्वयि दृष्ट एव तस्या
निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति
कुसुमं कुमुदवत्या: ।।
कस्यालङ्कारस्य उदाहरणम् ?

(A) दृष्टान्तस्य (B) निदर्शनाया: (C) अपह्नुते: (D) विशेषोक्ते:

**29.** शिशुपालवधस्य रैवतकपर्वतस्य वर्णनं कस्मिन् सर्गे विद्यते ?

(A) चतुर्थसर्गे (B) पञ्चमसर्गे (C) सप्तमसर्गे (D) अष्टमसर्गे

**30.** वाच्यप्रतीयमानाख्यौ कस्य भेदौ भवत: ?

(A) अभिनयस्य (B) अर्थस्य (C) शब्दस्य (D) भावस्य

**31.** रसानुमितिवाद: कस्य ?

(A) शङ्कुकस्य (B) लोल्लटस्य (C) भट्टनायकस्य (D) अभिनवगुप्तस्य

32. रत्नावल्यां 'रत्नावलीलाभचक्रवर्तित्वावाप्तिः' कस्य उदाहरणम् ?

(A) फलागमस्य (B) प्राप्त्याशायाः (C) नियताप्तेः (D) यत्नस्य

33. 'विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति' – इति वाक्यं कस्य ?

(A) शुकनासस्य
(B) चन्द्रापीडस्य
(C) तारापीडस्य
(D) राज्यवर्धनस्य

34. 'अद्' धातोः लट् लकारस्य मध्यमपुरुषस्य बहुवचनं रूपं किम् ?

(A) अत्ति (B) अत्थ (C) अत्थः (D) अत्सि

35. ब्रह्मा कस्य वेदस्य ऋत्विगस्ति ?

(A) ऋग्वेदस्य
(B) अथर्ववेदस्य
(C) सामवेदस्य
(D) यजुर्वेदस्य

36. अधोलिखितेषु कः महायज्ञः नास्ति ?

(A) ऋषियज्ञः (B) नृयज्ञः (C) देवयज्ञः (D) अश्वमेधयज्ञः

37. 'लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषं प्रमाणमुक्तम्' इति कस्मिन् ग्रन्थे प्राप्यते ?

(A) याज्ञवल्क्यस्मृत्याम्
(B) अत्रिस्मृत्याम्
(C) पराशरस्मृत्याम्
(D) हारितस्मृत्याम्

38. 'आन्वीक्षिकीत्रयीवार्तादण्डनीतिश्चेति विद्या" इति कस्य मतम् ?

(A) मनोः
(B) शौनकस्य
(C) कौटिल्यस्य
(D) बृहस्पतेः

39. पञ्चकोशविवरणं कुत्र प्राप्यते ?

(A) केनोपनिषदि
(B) तैत्तिरीयोपनिषदि
(C) कठोपनिषदि
(D) मुण्डकोपनिषदि

**40.** कृतयुगस्य धर्म: क: ?

(A) तप:   (B) यज्ञ:   (C) ज्ञानम्   (D) दानम्

**41.** 'वेदप्रतिपाद्य: प्रयोजनवदर्थ:' इति कस्य लक्षणम् ?

(A) वेदस्य   (B) यज्ञस्य   (C) धर्मस्य   (D) मन्त्रस्य

**42.** अज्ञातार्थज्ञापको वेदभागो क: ?

(A) धर्म:   (B) अधर्म:   (C) विधि:   (D) यज्ञ:

**43.** 'अधिशीङ्स्थासाम्' इति उपसर्गपूर्वकधातुभि: सह का विभक्ति: ?

(A) द्वितीया   (B) पञ्चमी   (C) तृतीया   (D) सप्तमी

**44.** 'जायमान:' इति अत्र क: प्रत्यय: ?

(A) शतृ   (B) क्त   (C) शानच्   (D) क्तवतु

**45.** 'निर्मक्षिकम्' इति अत्र क: समास: ?

(A) अव्ययीभावसमास:   (B) कर्मधारयसमास:

(C) तत्पुरुषसमास:   (D) द्वन्द्वसमास:

**46.** 'स्तुत्य:' इत्यत्र क: प्रत्यय: ?

(A) क्यप्   (B) यत्   (C) ण्यत्   (D) क्त्वा

**47.** 'ग्रीष्मर्तु:' इत्यत्र क: सन्धि: ?

(A) गुणसन्धि:   (B) अयादिसन्धि:

(C) यणसन्धि:   (D) वृद्धिसन्धि:

**48.** कुन्तकानुसारं कविव्यापारवक्रत्वप्रकारा: कति ?

(A) षट्   (B) त्रय:   (C) पञ्च   (D) अष्टौ

**49.** परिसंख्याविधेरुदाहरणं किम् ?

(A) यजेत स्वर्गकामः

(B) व्रीहीन् अवहन्ति

(C) दध्ना जुहोति

(D) पञ्च-पञ्च नखाः भक्ष्याः

**50.** पाणिपादम्-पाणी च पादौ च तेषां समाहारः इत्यस्य कः समासः ?

(A) द्वन्द्वसमासः

(B) अव्ययीभावसमासः

(C) तत्पुरुषसमासः

(D) कर्मधारयसमासः

**51.** ब्रह्म कस्माद् वेदात् अभिनयं स्वीकृतवान् ?

(A) यजुर्वेदात्

(B) अथर्ववेदात्

(C) सामवेदात्

(D) ऋग्वेदात्

**52.** प्रयोगविधिः कीदृशः ?

(A) कर्मस्वरूपमात्रबोधकः

(B) कर्मजन्मफलसाम्यबोधकः

(C) प्रयोगप्राशुभावबोधकः

(D) अङ्गप्रधाननिबन्धबोधकः

**53.** "सदूषणापि निर्दोषा सखरापि सुकोमला ।
नमस्तस्यै कृता येन रम्या रामायणी कथा"
अयं श्लोकः कस्य कवेः ?

(A) त्रिविक्रमभट्टस्य

(B) जयन्तभट्टस्य

(C) बाणभट्टस्य

(D) भवभूतेः

**54.** श्लिष्टपद योजनायामधिका सफलता केन कविना प्राप्ता ?

(A) त्रिविक्रमभट्टेन

(B) भवभूतिना

(C) बाणभट्टेन

(D) जयन्तभट्टेन

**55.** नरकस्य स्थाने नर्क इति उच्चारण-कारणं किम् ?

(A) सादृश्यता

(B) सांस्कृतिककारणम्

(C) राजनीतिकारणम्

(D) धार्मिककारणम्

56. कथं प्रत्याहारः ?

(A) वृत्यर्थः (B) व्यवहारार्थः (C) ज्ञानार्थः (D) आचारार्थः

57. एतेषु किं रामायणाश्रितं महाकाव्यं नास्ति ?

(A) रघुवंशम् (B) जानकीहरणम्

(C) सेतुबन्धमहाकाव्यम् (D) सौन्दरानन्दमहाकाव्यम्

58. बौद्धदर्शनानुसारं गुरुक्तस्यार्थस्याङ्गीकरणं किं नामधेयम् ?

(A) योगः (B) आचारः (C) पर्यनुयोगः (D) महोदयः

59. कः वैयाकरणः 'कलिकालसर्वज्ञ'-रूपेण लोकप्रसिद्धः ?

(A) हेमचन्द्रः (B) जैनेन्द्रः (C) शाकटायनः (D) नागेशभट्टः

60. सावित्री-उपाख्यानं महाभारतस्य कस्मिन् पर्वणि विद्यते ?

(A) वनपर्वणि (B) सभापर्वणि

(C) उद्योगपर्वणि (D) शान्तिपर्वणि

61. व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वत् कान् प्रयोजयेत् ?

(A) शब्दान् (B) वर्णान् (C) पदानि (D) वाक्यानि

62. रत्नावल्याम् उदयनस्य कञ्चुकी कः ?

(A) बाभ्रव्यः (B) यौगन्धरायणः

(C) वसन्तकः (D) विक्रमबाहुः

63. सर्पिषो जानीते इत्यत्र क्रियापदे आत्मनेपदविधायकं सूत्रं किम् ?

(A) तङाऽऽनावाऽऽत्मनेपदम्

(B) अनुदात्तङित आत्मनेपदम्

(C) कर्तरि कर्मण्यतिहारे

(D) अकर्मकाच्च

**64.** 'उपरमति' इत्यत्र परस्मैपदविधायकं सूत्रं किम् ?

(A) व्याङ्परिभ्यो रमः

(B) अनुपराभ्यां कृञः

(C) अभिप्रत्यतिभ्यः क्षिपः

(D) उपाच्च

**65.** पारिवारिक वर्गीकरणेन सम्बद्धं किम् ?

(A) फलसाम्यम्

(B) पदसाम्यम्

(C) ध्वनिसाम्यम्

(D) अर्थसाम्यम्

**66.** संस्कृतभाषायाः 'शतम्' इति पदं गॉथिकभाषायां 'हुन्द' भवति इति कस्य मतम् ?

(A) ग्रिममहोदयस्य

(B) ग्रासमानमहोदयस्य

(C) वर्नरमहोदयस्य

(D) थोम्पसनमहोदयस्य

**67.** 'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः' इत्यादि श्लोकः कस्य उदाहरणरूपेन ध्वन्यालोके उल्लिखितः ?

(A) आक्षेपालङ्कारस्य

(B) अविवक्षितवाच्यस्य

(C) विशेषोक्त्यलङ्कारस्य

(D) विवक्षितान्यपरवाच्यस्य

**68.** का प्राप्त्याशा भवति ?

(A) फललाभाय औत्सुक्यमात्रम्

(B) अप्राप्तौ अतित्वरान्वितो व्यापारः

(C) उपायापायशङ्काभ्यां प्राप्तिसंभवः

(D) अपायाभावतः प्राप्तिः

**69.** समुद्रगुप्तस्य भारतदिग्विजयः कस्मिन् शिलालेखे अस्ति ?

(A) मन्दसोर शिलालेखे

(B) गिरनार शिलालेखे

(C) एलाहाबाद शिलालेखे

(D) ऐहोल शिलालेखे

**70.** 'आनि लोट्' इत्यनेन किं विधीयते ?

(A) णत्वम्

(B) कुटवम्

(C) षत्वम्

(D) मत्वम्

**71.** याज्ञवल्क्यस्मृतौ दिव्यप्रयोगेषु परिगणितं नास्ति ________ ।

(A) तुलाप्रयोग: (B) अग्निप्रयोग: (C) विषप्रयोग: (D) वायुप्रयोग:

**72.** काव्यप्रकाशे 'सद्य: परनिर्वृति:' इति पदं कमभिप्रैति ?

(A) काव्यस्वरूपम् (B) काव्यकारणम्

(C) काव्यप्रयोजनम् (D) शब्दशक्तिम्

**73.** किरातार्जुनीये 'चारचक्षुष:' इति पदेन कोऽभिप्रेत: ?

(A) उपनेत्रधारी (B) गुप्तचर: (C) अमात्य: (D) सेनापति:

**74.** 'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्' इत्यनेन सम्बद्धं महाकाव्यं किम् ?

(A) शिशुपालवधम् (B) कुमारसम्भवम्

(C) नैषधीयचरितम् (D) किरातार्जुनीयम्

**75.** भरत: कस्य सम्प्रदायस्याऽऽचार्य: ?

(A) रीति-सम्प्रदायस्य (B) ध्वनिसम्प्रदायस्य

(C) रससम्प्रदायस्य (D) औचित्यसम्प्रदायस्य

**76.** कति कल्पा: सन्ति ?

(A) चत्वार: (B) पञ्च (C) सप्त (D) नव

**77.** आपस्तम्बीयशुल्वभाष्यम् इत्यस्य रचनाकार: क: ?

(A) करबिन्दस्वामी (B) सुन्दरराज:

(C) बोधायन: (D) गोपाल:

**78.** बौद्धधर्मे शून्यवादस्य प्रवर्तक: क: ?

(A) नागार्जुन: (B) बिम्बसार:

(C) वस्तुमित्र: (D) संघमित्र:

79. "रामो विग्रहवान् धर्मः" रामायणे क उवाच ?

(A) वसिष्ठः (B) दशरथः (C) हनुमान् (D) मारीचः

80. रामायणे सीतायै का पतिव्रतोपदेशं ददौ ?

(A) मन्दोदरी (B) त्रिजटा (C) अनसूया (D) सुनयना

81. भर्तृहरिकृतस्य वाक्यपदीयस्य टीकाकारो नास्ति __________ ।

(A) हेलाराजः (B) पुण्यराजः (C) रघुनाथशर्मा (D) कैय्यटः

82. अधोलिखितायां प्रक्रियायां मतिशब्दस्य कुत्र नदीसंज्ञा नास्ति ?

(A) मत्यै (B) मत्याः (C) मतीनाम् (D) मत्याम्

83. पुनः पुनः पचतीति अर्थे पच् धातोः लट्लकारे किं रूपं सिद्ध्यति ?

(A) पपच्यते
(B) पापच्यते
(C) परिपच्यते
(D) परिपाच्यते

84. श्रोतुमिच्छतीति अर्थे सन्नन्तरूपं किम् ?

(A) शुश्रूषते
(B) सुश्रूषति
(C) शुश्रूषति
(D) शुश्रुषति

85. संस्कृतभाषायाः प(p) कारस्य अन्यभाषायां f – इति वर्ण – परिवर्तनं कस्य नियमेन उपपद्यते ?

(A) ग्रासमानमहोदयस्य
(B) ग्रिममहोदयस्य
(C) वर्नरमहोदयस्य
(D) मैक्सम्यूलरमहोदयस्य

86. कस्य मते वक्रोक्तिस्तु अलङ्कार एवास्ति ?

(A) विश्वनाथमते
(B) जगन्नाथमते
(C) कुन्तकमते
(D) भामहमते

87. विरतास्वभिधाद्यासु यथार्थो बोध्यते पर: सा वृत्ति: का ?

(A) व्यञ्जना (B) अभिधा (C) लक्षणा (D) शक्ति:

88. उपादानलक्षणा का ?

(A) जहत्स्वार्था (B) अजहत्स्वार्था
(C) केवललक्षणा (D) सम्बन्ध लक्षणा

89. औचित्यसम्प्रदायस्य प्रवर्तक: क: ?

(A) विश्वनाथ: (B) क्षेमेन्द्र: (C) जगन्नाथ: (D) कुन्तक:

90. मत्तुस्वामिचरितं महाकाव्यं केन विरचितम् ?

(A) अम्बिकादत्त व्यासेन (B) बिल्हणेन
(C) श्रीधर भास्कर वर्णेकरेन (D) वी. राघवन् महोदयेन

91. 'मीरालहरी' कस्य रचना अस्ति ?

(A) क्षमारावस्य (B) वी. राघवन् इत्यस्य
(C) अम्बिकादत्तव्यासस्य (D) श्रीधर भास्कर वर्णेकरस्य

92. 'जाम्बवतीविजय:' (पातालविजय:) इत्यस्य लेखक: क: ?

(A) पाणिनि: (B) पतञ्जलि: (C) कात्यायन: (D) व्याडि:

93. 'वारि' शब्दस्य सप्तमी एकवचने किं रूपं भवति ?

(A) वारिण: (B) वारीणि (C) वारिणि (D) वारिणी

94. जम्बूखण्डस्य विस्तरं वर्णनं महाभारतस्य कस्मिन् पर्वणि ?

(A) आदिपर्वणि (B) भीष्मपर्वणि (C) उद्योगपर्वणि (D) समापर्वणि

95. न निर्बद्धा उपसर्गा अर्थन्निराहुरिति को वदति ?

(A) यास्क: (B) शाकटायन: (C) सायण: (D) गार्ग्य:

**96.** ध्रुवसंज्ञकं नक्षत्रमस्ति ।

(A) कृत्तिका (B) रोहिणी (C) मार्गशीर्ष: (D) आर्द्रा

**97.** सम्बोधनात्मकपदस्य अन्ते विद्यमानस्य 'ओ' कारस्य का संज्ञा भवति ?

(A) संयोग: (B) रेफित: (C) प्रगृह्य: (D) समानाक्षर:

**98.** कालानुसारेण कस्तावत् अर्वाचीन: ?

(A) भरत: (B) जगन्नाथ: (C) विश्वनाथ: (D) भामह:

**99.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत ।

a. अश्वघोष: i. वेणीसंहारम्

b. विशाखदत्त: ii. बुद्धचरितम्

c. भट्टनारायण: iii. मालतीमाधवम्

d. भवभूति: iv. मुद्राराक्षसम्

(A) a-i b-ii c-iii d-iv

(B) a-ii b-iv c-i d-iii

(C) a-iii b-ii c-i d-iv

(D) a-ii b-i c-iii d-iv

**100.** न्यायसिद्धान्तमुक्तावली कस्य ग्रन्थस्य टीका वर्तते ?

(A) न्यायदर्पणस्य (B) न्यायसूत्रस्य

(C) कारिकावल्या: (D) न्यायकुसुमाञ्जले:

Space for Rough Work

SEAL